Total Pages – 4 B.A. RNLKWC-/Sanskrit/CC-5/SEM-III/23

# 2023

## SANSKRIT (H)

## B.A. Third Semester End Examination - 2023

## PAPER - CC-5

*Full Marks : 60* *Time : 3 hours*

*The figures in the right-hand margin indicate marks.*
*Candidates are required to give their answers in their own words as far as practicable.*
*Illustrate the answers wherever necessary.*

**A. संस्कृतभाषया देवनागरीलिप्या च दश प्रश्नाः समाधेयाः** 2×10=20

1. महर्षेः कण्वस्य आश्रमः कुत्र वर्तते? आश्रमस्य कुलपतिः कः आसीत्?
2. शकुन्तला कस्यै लतायै जलं प्रयच्छति स्म? शाकुन्तले नान्दी-श्लोकः केन छन्दसा विरचितः?
3. अभिज्ञानशकुन्तलस्य प्रस्तावना कीदृशी?
4. शारद्वतः क आसीत्? हस्तिनापुरं प्रविश्य तस्य कानुभूतिः अभवत?
5. कति रूपकाणि? कानि च तानि?

(Turn Over)

6. ''चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः''—
वाक्यमिदं कः कं प्रति अवदत्?

7. 'भास-समस्या' का?

8. 'स्वप्नवासवदत्तम्' इति नाटकस्य विदूषकस्य नाम किम्? राज्ञः उदयनस्य द्वयोः मन्त्रिणोः नाम लिखत।

9. ''दुःखं न्यासस्य रक्षणम्'' —अस्याः उक्तेः वक्ता कः? अत्र न्यासः इत्यनेन कः बोध्यते?

10. ब्रह्मचारी कः? स कस्मात् स्थानात् कुत्र आगच्छत्?

11. नायकलक्षणं किम्?

12. भासस्य महाभारताश्रितानि रूपकाणि कानि भवन्ति?

13. मृच्छकटिके नायकः कः भवति? स कीदृशो नायकः?

14. कालिदासस्य प्रथमं नाटकं किमस्ति? अस्य नाटकस्य नायकः कोऽस्ति?

15. 'मालतीमाधवम्' कीदृशं रूपकम्? अस्य रूपकस्य उत्सः कोऽस्ति?





**B. चतुर्णां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरी लिप्या च प्रदेयम्।**

**5×4=20**

1. व्याख्या कार्या –

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

2. व्याख्या कार्या –

यात्येकतोऽस्तशिखरं पतिरोषधिना
माविष्कृतारुणपुरःसर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यासनोदयाभ्यां
लोको नियम्यत इवात्मदशान्तरेषु॥

3. व्याख्यायताम्–

स्वप्नो नु माया नु मतिभ्रमो नु क्लिष्टं नु तावत्फलमेव पुण्यम्।
असंनिवृत्त्यै तदतीतमेते मनोरथा नाम तटप्रपाताः॥

4. यथानिर्देशमुत्तरत –

(i) सन्धिविच्छेदं कुरुत। यात्येकतः।

(ii) सविग्रहं समासनाम लिखत। दशान्तरेषु

(iii) सकारणं विभाक्तिं निर्णयत। उेदति वसुधातलात्।

5. व्याख्यायताम्

प्रद्वेषो बहुमानो वा संकल्पादुपजायते।

भर्तृदाराभिलाषित्वादस्यां मे महती स्वता।।

अथवा

भावसम्प्रसारणं कुरुत।

सुखमन्यद् भवेत् सर्वं दु:खं न्यासस्य रक्षणम्।

6. लघुटिप्पणीं लिखत।

रत्नावली

**C. प्रश्नद्वयं समाधेयम्।** **10×2=20**

1. 'अभिज्ञानशकुन्तलम्' इति नाटके दुर्वाससः शापवृत्तान्तस्य तात्पर्यं निरूपयत।

2. अभिज्ञानशकुन्तलमाश्रित्य हंसपदिकागीतस्य तातूपर्यमालोच्यताम्।

3. 'स्वप्नवासवदत्तम्' इति नाटके उदयनस्य चरितम् आलोचयत।

4. कालिदासस्य नाटकानि संक्षेपेण आलोचयत।